संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - ५
प्रधानसम्पादकः - वेम्पटि कुटुम्बशास्त्री

सुकुमारकविविरचितम्

# श्रीकृष्णविलासमहाकाव्यम्

## गोविन्दसूरिविरचितया बालपाठ्यव्याख्ययाऽलङ्कृतम्

(आदितः सप्तमसर्गान्तो भागः)

सम्पादकः
इ.एम्. राजन्

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

Samskrita Varsha Smriti Grantha Mala
Unpublished Manuscript Publication - 5
General Editor - Vempaty Kutumba Sastry

# ŚRIKṚṢṆAVILĀSA MAHĀKĀYA

OF

SUKUMĀRAKAVI

ALONGWITH

# BĀLAPĀṬHYA COMMENTARY

OF

GOVINDASURI

Edited By
**E.M. Rajan**

**Rashtriya Sanskrit Sansthan**
**New Delhi**

# आमुखम्

अथ विदितचरमेवैतत् समेषां यत् युगाब्दः ५१०१ (१९९९-२०००)- तमो वर्षः संस्कृतवर्षः इति भारतशासनेन समुद्घोषितः आसीत्। तदनुसारं भारतशासनेन मानवसंसाधनविकासमन्त्रालयेन, राष्ट्रियसंस्कृतसंस्थानेन अन्याभिश्च विविधाभिः संस्थाभिः राष्ट्रेऽस्मिन् कोणे कोणे बहवः बहुविधाश्च कार्यक्रमाः आयोजिताः अनुष्ठिता आसन्। ऐतिहासिकेन एतेन संस्कृतवर्षसमुद्घोषणेन संस्कृतज्ञानां संस्कृत-प्रेमिणां संस्कृतबन्धूनां सामान्यजनानां च हृदयेषु यथोचितं संस्कृतविषयकं पुनर्जागरणं समुदभूत्। समग्रोऽपि राष्ट्रपरिवारः संस्कृतविषयकैः भावनाप्रचयैः सम्पूरितः समुत्तेजितश्च आसीत्।

ऐतिहासिकीम् आनन्दसन्दोहदां तामिमां संस्कृतवर्षस्मृतिं चिरस्मरणीयां विधातुं संस्कृतवर्षस्मृतिग्रन्थमाला इति नाम्ना त्रिशतस्य ग्रन्थानां प्रकाशनपर्यवसाना काचित् महत्त्वशालिनी योजना राष्ट्रियसंस्कृतसंस्थानेन स्वीकृता। योजनायामस्याम् अद्य यावत् अप्रकाशितानां शतस्य पाण्डुलिपिग्रन्थानां प्रकाशनम्, विविधासु भाषासु विरचितानां नैकशास्त्रसम्बद्धानाम् अभिनवानां शतस्य ग्रन्थानां संस्कृते अनूद्य प्रकाशनम्, प्रान्तभाषासु प्रसिद्धानां विविधवाङ्मयप्रक्रियारूपाणां शतस्य ग्रन्थानां संस्कृते अनूद्य प्रकाशनं च सङ्कल्पितं वर्तते।

तेष्वाद्यम् अप्रकाशित-हस्तलिखितग्रन्थप्रकाशनात्मकं सङ्कल्पं पुरस्कृत्य अधुना श्रीकृष्णविलासमहाकाव्यस्य बालपाठ्यव्याख्यां प्रकाश्य लोकायार्प्यत इत्युल्लसितं भवति मे मानसम्।

सकलजगत्कल्याणकारकस्य भगवतः श्रीकृष्णस्य लीलावर्णनात्मकस्य श्रीमद्भागवतस्य दशमस्कन्धमवलम्ब्य केरलीयेन प्रभाकर इत्यपरनामकेन सुकुमारकविना समारचितं श्रीकृणविलासकाव्यमतिविशिष्टिं वर्तते। बालानां भाषाव्युत्पत्तिवर्धनदृष्ट्या काव्यमिदं केरलेषु प्रशस्यत इति श्रूयते। काव्यस्यैतस्य महत्त्वमुररीकृत्य श्रीमद्गोविन्दाख्यः अलङ्कार-व्याकरण-ज्यौतिषादिशास्त्रविशारदः बालव्युत्पत्तिकारिणीं बालपाठ्यनाम्नीं व्याख्यामकरोत्। व्याकरणसूत्राणां कोषानां च उल्लेखं कृत्वा रचिता इयं व्याख्या द्वादशसर्गात्मकस्य मूलग्रन्थस्य सप्तसर्गावधिरेव

# विषयसूची


| | |
|---|---|
| सन्देशः | iii |
| आमुखम् | vii |
| अवतारिका | ix |
| कृतज्ञतानिवेदनम् | xiii |
| **सव्याख्यं श्रीकृष्णविलासम्** | 1 |
| अनुबन्धः | |
| क. बालपाठ्ये उद्धृताः ग्रन्थाः | 183 |
| ख. अकारादिक्रमेण पद्यानुक्रमणिका | 185 |

भ्राशे'त्यादिविकल्पात्त्रुट्यतेः शन्प्रत्ययः तृणानां स्तोमैर्वृन्दैश्चटत्कृतिन्यश्चटत्कारवत्यो गावश्चक्रपाणेश्चेतसि प्रियं चक्रुः। गोस्वभाववर्णनात् स्वभावोक्तिरलङ्कारः।।२१।।

हरिन्मणिश्यामरुचीनि तत्र स्वैरं चरन्तीषु तृणानि गोषु।
शौरिस्स्वयं भुक्त इवाप तृप्तिं तृप्यन्त्युदाराः परतर्पणेन।।२२।।

हरिदिति। तत्र वने गोषु हरिन्मणिवन्मरतकरत्नवत् श्यामा रुचः प्रभा येषान्तानि तृणानि स्वैरं स्वेच्छानुरूपं 'मन्दस्वच्छन्दयोस्वैर'मित्यमरः चरन्तीषु भक्षयन्तीषु सतीषु शौरिस्स्वयं भुक्तमस्यास्तीति भुक्तः मत्वर्थीयाच् प्रत्ययः 'कर्मणि भुज 'इति नियमात्र कर्त्तरि क्तः स इव तृप्तिमाप। तथाहि उदारा दातारः 'उदारौ दातृमहतो'रित्यमरः परेषां तर्पणेन तृप्यन्ति तृप्ता भवन्ति । तृपेर्दैवादिकाल्लट्।।२२।।


सर्वासु कण्डूयनलिप्सयोच्चैरुन्नम्य कण्ठं दधतीषु गोषु।
बालो हरिर्बाहुसहस्रशून्यं जन्मात्मनो निष्फलमेव मेने।।२३।।

सर्वास्विति। सर्वासु गोषु कण्डूयनं गात्रविघर्षणं कण्डूञ् गात्रविघर्षणे ततः स्वार्थे यक् ।ततो भावे ल्युट् । तस्य लिप्सया लब्धुमिच्छया 'सनिमीमे'यादिना अच इसादेशः अभ्यासलोपश्च कण्ठं गलमुच्चैरुन्नम्य उद्गमय्य मित्वाण्णावुपधाह्रस्वः दधतीषु दधानासु सत्सु नाभ्यस्ताच्छतुरिति नुमभावः बालो हरिः बाहुसहस्रशून्यमात्मनो जन्म निष्फलमित्येव मेने बाहुयुक्तसाहस्रश्चेत्सर्वासां युगपत् कण्डूयनसुकृतं लभेयमित्याकालय्येत्यर्थः।।२३।।


परिभ्रमद्गोकुलमुग्रकोपं समुच्चलद्धूलिरटद्विषाणम्।
स युद्धमुक्ष्णाम्मदनिर्भराणां प्रविश्य मध्यं शमयांचकार।।२४।।

परीति। स हरिः परिभ्रमत् गोकुलं युद्धदर्शनकौतुकेन भीत्या वा परितस्संचरत्सुरभिबृन्दं उग्रकोपं समुच्चलद्धूलिं धुन्वन् भूपरागं रटद्विषाणं परस्परघट्टनाच्चटचटायमानशृङ्गं मदनिर्भराणामतिमत्तानामुक्ष्णां वृषभाणां 'उक्षाभद्रोबलीवर्द ऋषभो वृषभो वृष'मित्यमरः युद्धं मध्यं प्रविश्य शमयाञ्चकार।।२४।।

शाखाकराग्रैरवलम्ब्य पृथ्वीं निषेदुषः पुष्पफलावनम्रान् ।
तत्र द्रुमान् सादरमीक्षमाणो जगाम तृप्तिं न कदापि शौरिः।।२५।।



**Rashtriya Sanskrit Sansthan**
56-57, Institutional Area, Janakpuri,
New Delhi 110 058